हिमसंस्कृतवार्ता:
दैनिकं ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ताः
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-5 ■ वर्ष-4 ■ अङ्क-195 | 1 | मई 14, 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
अद्य कालयुक्तः वि.सं. २०८२,
कलियुगाब्धः ५१२६ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणः ज्येष्ठकृष्णद्वितीया
वैशाख 30 प्रविष्ठांशः मङ्गलमयः भवेत्

2 सीबीएसई- दशमी-द्वादशीकक्ष्योः परीक्षापरिणामः घोषितः, बालिकाः हिमाचले शीर्षस्थाने
3 ज्ञानाधारितायाम् अर्थव्यवस्थायां सिद्धान्तस्य व्यवहारस्य च मध्ये सन्धिं कर्तुम् आवश्यकम् अस्ति- प्रो. कुहाडः
5 परमाणु शक्तिः एकम् चिन्तनम् - डॉ मनोज शैलः

## सिन्दूराभियानानन्तरं पञ्जाबप्रान्तस्य आदमपुरवायुसेनास्थानकं प्राप्तवान् प्रधानमन्त्री



हिमसंस्कृतवार्ताः - प्रधानमन्त्री नरेन्द्रमोदी एकं दृढं सन्देशं प्रदत्तवान् यत् पाकिस्ताने एतादृशं एकमपि स्थानं न अवशिष्टं यत्र आतङ्किनः शान्त्या श्वासमपि ग्रहीतुं शक्नुयुः । भारतम् आतङ्ककेन्द्राणि सटीकतया नष्टीकर्तुं पूर्णतया समर्थम् अस्ति। प्रधानमन्त्री अमुं सन्देशं पञ्जाबप्रान्तस्य आदमपुरवायुसेनास्थानके वीरसैनिकैः सह संवादावधौ प्रदत्तवान्। तेन सैन्यस्य साहसं सिन्दूराभियानावधौ देशरक्षार्थं भूरिशः प्रशंसितम्। सिन्दूरभियानस्य साफल्यविषये श्रीमोदी उक्तवान् यत् अस्य अभियानस्य अन्तर्गतं न केवलम् आतङ्ककेन्द्राणि नष्टीकृतानि अपितु शताधिकाः आतङ्किनः अपि निहताः । प्रधानमन्त्रिणा उक्तं यत् प्रत्येकं सैनिकस्य केवलं 'भारत माता की जय' इति जयघोषमेव संकल्पः अस्ति यः हि देशाय आत्मबलिदानं कर्तुं सर्वथा सिद्धः तिष्ठति। तेनोक्तं यत् एषः प्रत्येक नागरिकस्य स्वरः यः हि स्वदेशार्थमेव जीवितुम् इच्छति तथा च किमपि कर्तुं वाञ्छति। भारतस्य आयुधः स्वलक्ष्याणां विभेदनं सटीकतया केवलं पञ्चविंशनिमेषाभ्यन्तरे एव कृतम्।

## तिरङ्गायात्रा अभियानस्य प्रारम्भः, इदम् अभियानं त्रयोविंशतिः दिनाङ्क यावत् प्रचलिष्यति



**हिमसंस्कृतवार्ताः** - भारतीयसैन्यस्य 'सिन्दूराभियानान्तर्गतम्' पाकिस्तानं विरुध्य साफल्यस्य आराष्ट्रे प्रचारप्रसाराभ्यां एकादशदिवसात्मकम् अभियानं समारब्धम् । इदम् अभियानं तिरङ्गायात्रेति नाम्ना सर्वैः परिचेष्यते। सेवानिवृत्ताधिकारिणः सामाजिककार्यकर्तारः सामाजिकसंस्थाः तथा च भाजपादलस्य प्रमुखनेतारः अस्मिन् कार्यक्रमे सहभागितां करिष्यन्ति। एतदभियानं त्रयोविंशतिः दिनाङ्क यावत् प्रचलिष्यति।

## भारतस्य मुख्यन्यायाधीशस्य संजीव खन्नावर्यस्य सेवानिवृत्तिः



**हिमसंस्कृतवार्ताः** - भारतस्य मुख्यन्यायाधीशः संजीव खन्ना सेवानिवृत्तः । अनेन सह सर्वोच्चन्यायालयस्य एकपञ्चाशत्तम-मुख्यन्यायाधीशत्वेन तस्य कार्यकालः समाप्तिम् उपगतः। सः गतवर्षस्य नवम्बर्-मासस्य दशमे दिनाङ्के कार्यभारं गृहीतवान्, षण्मासान् यावत् भारतस्य मुख्यन्यायाधीशत्वेन श्रीखन्ना कार्यं कृतवान् । न्यायमूर्तिः श्रीखन्ना न्यायाधीशभूषणरामकृष्णगवई इत्यस्य नाम स्वस्य उत्तराधिकारित्वेन औपचारिकरूपेण अनुशंसितवान्।

## विमानसेवासमवायद्वारा वायुसेवानिरस्तीकरणं कृतम्

हिमसंस्कृतवार्ताः - एयर् इण्डिया द्वारा उक्तं यत् वर्तमानपरिस्थितिम् अभिलक्ष्य तथा च यात्रिणां सुरक्षां मनसि निध्याय जम्मू-लेह-जोधपुर-अमृतसर-भुज-जामनगर-चण्डीगढ-राजकोटान् प्रति ततश्च सर्वाः विमानसेवाः स्थगिताः स्थास्यन्ति। एकस्मिन् सामाजिकतन्त्रसन्देशे विमानसेवासमवायद्वारा लिखितं यद् एषा परिस्थितिः सम्यक्तया निरीक्षयन् अस्ति यात्रिणः च यथासमयं सूचयिष्यति । इण्डिगोवायुसेवासमवायेनापि जम्मू-लेह-अमृतसर-चण्डीगढ-राजकोटान् प्रति ततश्च सर्वाः निरस्तीकृताः । दिल्लीवायुयानस्थानके सेवासञ्चालनं सामान्यतया एव प्रचलिष्यति।

## केंद्रीय-माध्यमिक शिक्षणसंस्थानेन दशमकक्षायाः द्वादशकक्षायाः च परीक्षापरिणामः समुद्घोषितः

**हिमसंस्कृतवार्ताः** - केंद्रीय-माध्यमिक शिक्षणसंस्थानेन दशमकक्षायाः द्वादशकक्षायाः च परीक्षापरिणामः समुद्घोषितः अस्ति। द्वादशकक्षायाम् अस्मिन् वर्षे चतुर्नवत्युत्तर-सप्तशताधिक-द्विनवतिसहस्रोत्तर-षोडशलक्ष-छात्राः परीक्षायै उपस्थिताः आसन्। एतेषु अष्टाशीति-दशमलव-नवत्रिंशत्प्रतिशतं छात्राः समुत्तीर्णाः अभवन्, येन विगतवर्षस्य तुलनायां शून्य दशमलव-एकचत्वारिंशत्प्रतिशतम् अंकानां वृद्धिः द्योतते । छात्रैः तुल्यं छात्राभिः उत्तमप्रदर्शनं विहितमस्ति यासु एकनवतिप्रतिशततः अधिकाः छात्राः उत्तीर्णाः अभवन् । केंद्रीय-माध्यमिक शिक्षणसंस्थानस्य परीक्षानियंत्रकः संयमभारद्वाजः अकथयत् यत् अस्य वर्षस्य द्वादशकक्षायाः परीक्षायां शतप्रतिशतं किन्नर-छात्राःउत्तीर्णाः अभवन्। एतदतिरिक्तं दशमकक्षायाः परीक्षायां नवत्रिंशदधिक-नशतोत्तरैकसप्तति-सहस्राधिक-त्रयोविंशतिलक्षं छात्राः उपस्थिताः आसन्। एतेषु त्रिनवत्यधिक दशमलव-षट्षष्टि-प्रतिशतं छात्राः उत्तीर्णाः अभवन्। अस्यां परीक्षायामपि छात्राभिः सर्वाधिकाः पञ्चनवति-प्रतिशतम् अङ्काः सम्प्राप्ताः। प्रधानमन्त्री नरेन्द्रमोदी दशम-द्वादश-कक्षयोः समुत्तीर्णेभ्यः छात्रेभ्यः वर्धापनं प्रायच्छत्

## भारतस्य पश्चिमसीम्नः सुरक्षास्थितेः समीक्षां कृतवान् रक्षामन्त्री राजनाथसिंहः

हिमसंस्कृतवार्ताः - रक्षामन्त्री राजनाथसिंहः नवदेहल्याम् एकस्मिन् उच्चस्तरीये उपवेशने भारतस्य पश्चिमसीम्नः सुरक्षास्थितेः समीक्षां कृतवान् । उपवेशने अस्मिन् रक्षाप्रमुखः श्री-अनिलचौहानः नौसैन्यप्रमुखः एड्मिरल् दिनेशके त्रिपाठी सैन्यप्रमुखः उपेन्द्रद्विवेदी तथा च वायुसैन्योपप्रमुखः एयर् मार्शल् नर्मदेश्वरतिवारी च सहभागितां कृतवन्तः ।

## सुभाषितम्

**अष्टादशपुराणेषु, व्यासस्य वचनद्वयम्।**
**परोपकारः पुण्याय, पापाय परपीडनम्॥**

भावार्थः- 18 पुराणों में श्रीव्यास के दो वचन (प्रमुख) हैं- परोपकार से पुण्य होता है और पुण्य का फल सुख है। पर- पीड़ा से पाप होता है और पाप का फल दुःख होता है।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु
To get the latest h|msanskr|tvartah Da|ly Sanskr|t Newspaper every day, wr|te Hello on 7876636263 Watsapp

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## शोपिया-जनपदस्य शुकरू-केलर-वनक्षेत्रे सुरक्षाबलैः त्रयः आतङ्किनः मारिताः



हिमसंस्कृतवार्ताः - जम्मू-कश्मीरस्य शोपिया-जनपदस्य शुकरू-केलर-वनक्षेत्रे सुरक्षाबलैः सह जाते संघर्षे त्रयो आतंकिनः मारिताः । कश्मीरजनपदस्य आरक्षिमहानिदेशकः वी. के. बिरदी इत्यसौ अकथयत् यत् मारिताः त्रयः आतंकिनः सम्भवतः लश्कर-ए-तैयबा इत्यातंकिगुल्मस्य द-रेजिस्टेंस-फ्रंट-संघटनस्य च सदस्याः आसन् । मृतानाम् आतंकिनाम् अभिज्ञानाय प्रयासः क्रियते । इतः पूर्वं सुरक्षाबलैः आतंकिनाम् अन्वेषणाय क्षेत्रे अन्वेषणाभियानं प्रचालितम् । अभियानावधौ च, आतंकवादिभिः भीषणगोलिकाप्रहारः विहितः यस्य प्रत्युत्तरे त्रयो आतंकिनः मारिताः सन्ति।

# सीबीएसई- दशमी- द्वादशीकक्ष्योः परीक्षापरिणामः घोषितः, बालिकाः हिमाचले शीर्षस्थाने






हिमसंस्कृतवार्ताःकेन्द्रीय-माध्यमिकशिक्षामण्डलस्य (CBSE) दशमी-द्वादशीकक्ष्योः परीक्षापरिणामः घोषितः अस्ति। छात्राः DigiLocker मार्गेण स्वपरीक्षाफलं द्रष्टुं शक्नुवन्ति। हिमाचलप्रदेशे सीबीएसई- दशमी-द्वादशी- परीक्षापरिणामेषु बालिकाः शीर्षस्थानं प्राप्तवत्यः। उभयोः वर्गयोः उत्तीर्णता प्रतिशतं राष्ट्रियस्तरतः श्रेष्ठम् अस्ति। राज्यस्य २३२ विद्यालयेषु १२ कक्षायाः परीक्षायाः कृते ११,४१७ छात्राणां पञ्जीकरणं कृतम्। तेषु ११,३८५ जनाः परीक्षायाः कृते उपस्थिताः आसन्। १०,५६१ छात्राः परीक्षायां उत्तीर्णाः अभवन्। उत्तीर्णता प्रतिशतं ९२.७६ आसीत्। यत्र कन्यानां दशम-द्वादश-कक्षायाः परीक्षापरिणामेषु उत्तमं प्रदर्शनं कृतम् अस्ति। ९५.३ प्रतिशतं बालिकाछात्राः ९०.७७ प्रतिशतं बालकच्छात्राः च परीक्षायां उत्तीर्णाः अभवन्। राज्यस्य परीक्षापरिणामाः समीपस्थराज्यपञ्जाबः (९२.४७), हरियाणा (९१.०४), उत्तराखण्डः (८६.१५) इत्येतेभ्यः उत्तमाः सन्ति। परीक्षायै राज्ये १०८ केन्द्राणि निर्मितानि आसन्।

## दशमवर्गे उत्तीर्णता ९७.२६ प्रतिशतम्

यत्र राज्ये दशमीकक्षायां १७२०४ छात्राः पञ्जीकरणं कृतवन्तः, १७१७७ छात्राः परीक्षायां उपस्थिताः आसन्। अस्मिन् ९,५१६ बालकाः, ७,६६१ बालिकाः च सन्ति। १६,७०६ छात्राः परीक्षायां उत्तीर्णाः अभवन्, उत्तीर्णता प्रतिशतं च ९७.२६ वर्तते। ९८.०९ प्रतिशतं बालिकाछात्राः ९६.५८ प्रतिशतं बालकच्छात्राः च परीक्षायां उत्तीर्णाः अभवन्। एवं प्रकारेण दशमी कक्षायाम् अपि कन्याः शीर्षस्थानं प्राप्तवत्यः। दशमीकक्षायाः परीक्षायाः परिणामेषु अपि उत्तराखण्डः, हरियाणा, पञ्जाबः च हिमाचलतः पश्चात् अभवन्। राज्यस्य दशमश्रेणीपर्यन्तं ३२० विद्यालयानां ११९ केन्द्रेषु परीक्षा कृता।

# कश्मीरसमस्या उभयदेशयोः आन्तरिकः विषयः, उभौ तस्य समाधानं करिष्यतः विक्रमादित्यसिंहः





**हिमसंस्कृतवार्ताः-** शिमला। लोकनिर्माणमन्त्री विक्रमादित्यसिंहः अवदत् यत् भारतीयसेनायाः पाकिस्तानविरुद्धं कृता कार्यविधिः सम्पूर्णेन देशेन प्रशंसिता अस्ति। अद्य सम्पूर्णः देशः भारतीयसेनया सह शिला इव तिष्ठति। काङ्ग्रेसस्य वरिष्ठनेता राहुलगान्धी लोकसभायां विपक्षस्य नेता अस्ति। अस्य विषये विशेषसत्रं आह्वयितुं सः कथितवान् अस्ति। पाकिस्तानदेशः आतङ्कवादिनां दुर्गम् अस्ति। १९७१ तमे वर्षानन्तरं एतत् अभवत्। आतङ्कवादिनः संसदि आक्रमणं कृतवन्तः। पठानकोट-मुम्बई-नगरयोः अपि विस्फोटाः अभवन्। कश्मीरस्य अन्तः आक्रमणं कृतम्। विक्रमादित्यसिंहः अवदत् यत् विपक्षः इच्छति यत् एतस्य सम्पूर्णस्य विषयस्य सदने चर्चा भवतु। भारत-पाकिस्तान-युद्धस्य विषये यथा अमेरिकीराष्ट्रपतिः स्वस्य ट्वीट-मध्ये उक्तवान्, तथैव सः अवदत् यत् कश्मीरसमस्या द्वयोः देशयोः आन्तरिकः विषयः अस्ति। एतस्य समाधानं भारतस्य पाकिस्तानस्य च कार्यम् अस्ति। सदनस्य विपक्षनेतृणां च मध्ये यदा चर्चा भविष्यति तदा अस्मिन् विषये पूर्णतया स्पष्टता उद्भवति। सः अवदत् यत् भारते हिमाचले च तुर्की-सेबस्य आगमनं चिन्ताजनकम् अस्ति। भारत-पाकिस्तानयोः युद्धकाले चीन-तुर्की-देशयोः भारतविरुद्धम् आविर्भूतौ। एतादृश्यां सति तुर्की-सेबस्य आयातशुल्कं वर्धयितुं आवश्यकता वर्तते। यदा यदा आयातशुल्कं न्यूनीकरोति तदा तदा हिमाचलस्य सर्वाधिकं प्रभावः भवति। हिमाचलप्रदेशे सेबतः ५००० कोटिरूप्यकाणां अर्थव्यवस्था अस्ति। आयातशुल्कवृद्ध्या हिमाचलस्य उद्यानपालकानां सर्वाधिकं हानिः भवति। तद् सेबफलं चीनदेशात् आगच्छति वा अमेरिकादेशात् वा। वयं मुख्यमन्त्रिणः समक्षं एतत् विषयं उत्थापयिष्यामः। सः अवदत् यत् हिमाचललोकसभा-राज्यसभा-सांसदैः अपि एषः विषयः उत्थापनीयः। येन प्रधानमन्त्री अस्य विषयस्य कठोरं संज्ञानं गृह्णाति।

# छात्रवृत्तिभ्रष्टाचारे केन्द्रीयान्वेषणदलेन षट् नवीनानि एफआईआर-पत्राणि पञ्जीकृतानि

**हिमसंस्कृतवार्ताः-** शिमला। हिमाचलप्रदेशस्य १८१ कोटिरूप्यकाणां छात्रवृत्तिभ्रष्टाचारे विस्तृतम् आरोपपत्रं प्रविश्य अधुना केन्द्रीयान्वेषणदलेन अस्मिन् प्रकरणे षट् नवीनानि एफआईआरपत्राणि पञ्जीकृतानि सन्ति। सीबीआई भ्रष्टाचारनिवारणविधानस्य विभिन्नप्रावधानानाम् अन्तर्गतं अज्ञातसर्वकारीय- अधिकारिणाम् अन्येषां च आरोपिणां विरुद्धं छात्रवृत्तिभ्रष्टाचारे षट् नवीनानि प्राथमिकीपत्राणि पञ्जीकृतानि सन्ति। एतानि प्राथमिकीपत्राणि शिमलानगरस्य सीबीआईक्षेत्रीयमुख्यालये पञ्जीकृतानि सन्ति।एतेन सह सीबीआईसङ्घस्य षट्दलानि षट्स्थानानि आक्रमितवन्तः। सीबीआईदलैः हिमाचलप्रदेशे द्वयोः स्थानयोः, पञ्जाबस्य त्रीणि स्थानानि, चण्डीगढस्य एकस्मिन् स्थाने च अन्वेषणं कृत्वा सम्पत्तिसम्बद्धैः अभिलेखैः सहितम् अनेके आपत्तिजनकप्रपत्राणि गृहीतानि सन्ति।

# अहो! हिमाचलम्, २ वर्षीयः बालकः श्रमं करोति, परिवारस्य सदस्याः अनभिज्ञाः

हिमसंस्कृतवार्ताः- सोलनम्। सोलान-जनपदस्य सेर बनेड़ायां एकं विचित्रं प्रकरणं प्रकाशितम् अस्ति। पंचायतस्य परिवारपञ्जिकायां २ वर्षीयः अबोधः बालकः निजीक्षेत्रे कार्यं कुर्वन् साक्षरः च इति दर्शितः अस्ति। दारिद्र्यरेखायाः (BPL) अधः निवसन् बालस्य पितामहः जोगिन्दरसिंहः अस्य त्रुटिं दृष्ट्वा आघातं प्रकटितवान्। तस्य परिवारः जर्जरगृहे निवसितुं बाध्यः भवति, सर्वकारीययोजनानां लाभात् अपि वंचितः भवति। जोगिन्दरसिंहः यत् एतत् दोषं सम्यक् कर्तुं तस्मै सहायतां प्रदातुम् च प्रशासनात् आह्वानं कृतवान्। खण्डविकास- अधिकारी रमेश शर्मा इत्यनेन लिपिकीय-त्रुटिः इति उक्त्वा अन्वेषणस्य तत्कालं परिष्कारस्य च आश्वासनं दत्तम्। सः अवदत् यत् यदि परिवारः योग्यः भवति तर्हि आवाससहायता अपि प्रदत्ता भविष्यति।



# शिमला-चम्बा-किन्नौरे नास्ति निरक्षरः मुक्तबोर्डपरीक्षायाम् उत्तीर्णतां प्राप्य २८०६२ जनाः साक्षराः अभवन्

हिमसंस्कृतवार्ताः। हिमाचलप्रदेशस्य निरक्षराः २८०६२ जनाः परीक्षायां उत्तीर्णाः साक्षराः अभवन् । सः मुक्तमण्डलस्य आधारभूतसाक्षरता-सङ्ख्यामूल्यांकनपरीक्षायां १५० अंकैः उत्तीर्णः अस्ति । न्यूनाङ्कान् प्राप्तवन्तः ४७२ जनाः आगामिवर्षे पुनः परीक्षायां उपस्थिताः भविष्यन्ति। अधुना शिमला, चम्बा, किन्नौर इत्यत्र निरक्षरः नास्ति। तत्सह परीक्षायां सिरमौर-मण्डी-कुल्लू-मण्डलानां जनाः पश्चात्तापं कृतवन्तः । एतेषु मण्डलेषु परीक्षां न उत्तीर्णानां जनानां संख्या अधिका अस्ति । शिक्षा-साक्षरता-मन्त्रालयस्य उल्लास-नवभारत-साक्षरता-कार्यक्रमस्य अन्तर्गतं राज्ये मार्च-मासस्य २३ दिनाङ्के अशिक्षितानां कृते परीक्षा आयोजिता । अस्मिन् १५ तः ८५ वर्षाणां मध्ये ये जनाः द्वितीयश्रेणीपर्यन्तं अध्ययनं कृतवन्तः परन्तु अधुना पठनलेखनं विस्मृतवन्तः, ते निरक्षराः इति गण्यन्ते । साक्षरता-अभियानम् उल्लास् इत्यत्र अपि साक्षरत्वस्य परिभाषा परिवर्तिता अस्ति । इदानीं ये केवलं हस्ताक्षरं कुर्वन्ति ते साक्षराः न मन्यन्ते। मुक्तमण्डलस्य १५० अंकानाम् आधारभूतसाक्षरता-संख्या-मूल्यांकनस्य (FLNET) परीक्षायां सहस्रपर्यन्तं गणना, योग-न्यूनकर्णं, गुणन-विभाजनं च उत्तीर्णं कृत्वा एव साक्षरः भवितुम् अर्हति एतदतिरिक्तं टिप्पणीनां परिचयः, दूरभाषादिप्रयोगः च परीक्षितः भवति ।

# ज्ञानाधारितायाम् अर्थव्यवस्थायां सिद्धान्तस्य व्यवहारस्य च मध्ये सन्धिं कर्तुम् आवश्यकम् अस्ति- प्रो. कुहाडः



हिमसंस्कृतवार्ताः- कुलदीपमैन्दोला, श्रीनगरम् (गढवालम्)।"अनुसन्धानम् उच्चशिक्षायाः प्रमुखः स्तम्भः अस्ति। एतत् नवीनं ज्ञानं उत्पादयति च, शैक्षिकम् आधारं दृढं करोति च। तथापि, अस्य ज्ञानस्य वास्तविकं प्रभावं तदा एव सम्भवः यदि तत् व्यवहारतः अपि अन्वितं भवेत्। सैद्धान्तिकज्ञानस्य तस्य च व्यवहारात्मकप्रयोगस्य मध्ये या रिक्तिः अस्ति, सा अद्यतनस्य ज्ञानाधारितस्य अर्थव्यवस्थायाः प्रमुखम् आवश्यकं पूर्त्यर्थम् अस्ति," इति हरियाणा-केन्द्र- विश्वविद्यालयस्य पूर्वकुलपतिः, महर्षिदयानन्द- विश्वविद्यालय-. रोहतकस्य विशिष्टप्राध्यापकः च प्रो रमेशचन्द्रः कुहाडः इत्यनेन उक्तम्। प्रो. कुहाडः उक्तिरियम् अवोचत् यदा सः हेमवतीनन्दनबहुगुणा गढवालविश्वविद्यालयस्य मालवीयमिशन- शिक्षकप्रशिक्षण- केन्द्रेण आयोज्यमाने एकमासदीर्घे 'गुरुदक्षता' नाम्नि शिक्षकप्रवेशप्रशिक्षणकार्यक्रमे उद्घाटनसत्रे मुख्यातिथिरूपेण सन्नद्धः आसीत्। एषः कार्यक्रमः उच्चस्तरीय- सम्मिलितविधाने (हाइब्रिड- मोड) आयोज्यते स्म।चौरासपरिसरस्य निदेशकः, ग्रामप्रौद्योगिकी- विभागस्य संकायसदस्यः च प्रो. राजेन्द्रसिंहनेगी सत्रस्य अध्यक्षतां अकरोत्। अनेन उवाच- "अनुसन्धानं तस्य व्यवहारात्मकं प्रयोगः च स्थायित्वस्य तत्त्वे आधृतं भवेत्।" तेन उक्तम्- "स्थायित्वम् उच्चशिक्षायां केनचित् अतिरिक्ततत्त्वेन न गन्तव्यम्। तत् शैक्षिकसंरचनायाः अविभाज्यः अङ्गः भवेत् च सर्वेषां विषयाणां पाठ्यक्रमे अन्तर्भावितव्यम्।"अतिथीनां प्रतिभागिनां च स्वागतं कुर्वन्, केन्द्रस्य कार्यवाहकः निदेशकः डॉ. राहुलकुंवरसिंहः, प्रशिक्षणस्य महत्त्वं प्रतिपादितवान्। तेन उक्तम्- "उच्चशिक्षायां नियुक्ताः संकायसदस्याः स्वनियुक्तेः एकवर्षात् द्विवर्षपर्यन्तं समये प्रेरणाप्रशिक्षणम् अवश्यं कुर्युः।" तेन कार्यक्रमस्य परिदृश्यं प्रभावं च प्रभावकारीशिक्षकान् साकारयितुं कथं सहायकं भवति इति अपि स्पष्टीकृतम्। अस्मिन् कार्यक्रमे देशस्य एकोनविंशतिः विभिन्नराज्येभ्यः ७८ संकायप्रतिभागिनः भागं गृह्णन्ति स्म इति अपि तेन अवोचत्। अस्य सत्रस्य समन्वयनं केन्द्रस्य सहायकनिदेशकः डॉ. सोमेशः थपलियालः कृतवान्, यस्मिन् कार्यक्रमकार्यकारी डॉ. कविता भट्टः, च शिक्षकेतरकर्मचारीद्वयं अनिल कठैतः, पूनमरावतः च सहायकं कृतवन्तौ।

# महात्मा बुद्धस्य जीवनं त्यागं शान्तिं च प्रेरयति - डॉ. रत्नेश त्रिवेदी




हिमसंस्कृतवार्ताः बाँदा । महात्माबुद्धस्य जन्मदिवसस्य अवसरे उत्तरप्रदेशसंस्कृतसंस्थानं लखनऊ तथा डॉ. दयानन्द आङ्ग्लवैदिक इण्टर महाविद्यालय बाँदा इत्यस्य संयुक्ताश्रयेन डीएवी कॉलेज बांदा इत्यत्र "महात्मा बुद्धस्य सामाजिकं दार्शनिकं च चिन्तनं" इति विषये एकदिवसीयं संगोष्ठी आयोजितम्। सरस्वती देवीं पुष्पार्पणं दीपप्रज्वलनं च कृत्वा संगोष्ठ्याः उद्घाटनं कृतम्।प्रारम्भे महाविद्यालयस्य प्राचार्यः डॉ. आनंदकुमारेण अतिथिनां स्वागतं कृतम्। यस्यां पण्डितजवाहरलालनेहरू महाविद्यालयस्य सहायकप्राध्यापकः श्रीसूर्यकान्तमिश्रः एवं सहायकप्राध्यापकः श्रीरामसुभाषवर्मा समुपस्थितौ। स्वीये वक्तव्ये तेनोक्तं यद् भगवान् बुद्धः जनानां हिताय 'बहुजना हिताय' इति स्वधर्मस्य प्रचारार्थं देशस्य विभिन्नेषु भागेषु विदेशेषु च भिक्षवः प्रेषितवान् ।

विदेशेषु बौद्धधर्मस्य प्रसारणे अशोकादिसम्राट् अपि महत्त्वपूर्णां भूमिकां निर्वहन्ति स्म । मौर्यकालपर्यन्तं भारतात् चीन, जापान, कोरिया, मंगोलिया, बर्मा, थाईलैण्ड्, भारत-चीन, श्रीलङ्का इत्यादिषु बौद्धधर्मस्य प्रसारः अभवत् । एतेषु देशेषु बौद्धधर्मः बहुसंख्यकधर्मः अस्ति। संगोष्ठी संयोजकः वामदेवसंस्कृतमहाविद्यालय-बाँदायाः सहायकविभागाध्यक्षः डॉ. रत्नेश-कुमारत्रिवेदी उपस्थितः आसीत्। यः स्वभाषणद्वारा महात्माबुद्धस्य जीवने प्रकाशं कृतम्। सः स्वभाषणेन उपस्थितान् सर्वान् जनान् सम्बोधितवान्। अस्माभिः समाजेन तस्य आदर्शजीवनचरित्रात् विचारात् च शिक्षितव्यम्। कार्यक्रमस्य अन्ते संस्कृतशिक्षिका डॉ. जानकीशरण-शुक्लः सर्वेभ्यः कृतज्ञतां प्रकटितवान्। संगोष्ठ्यां विद्यालयस्य प्रबन्धकः श्री हरिप्रसाद गुप्ता तथा विद्यालयस्य अनेके प्रख्यातशिक्षकाः, छात्राः, कर्मचारिणश्चोपस्थिताः।

## चलचित्रवार्ताः

### अक्षयकुमारस्य 'भूत बंगला'

# चलच्चित्रे अधुना दर्शनं दास्यति जिशू सेनगुप्ता




हिमसंस्कृतवार्ताः - जगदीश डाभी, मुम्बई। प्राप्तवार्तानुसारं बॉलीवुडनायकः अक्षयकुमारः बहुवर्षेभ्यः अनन्तरं भयानकहास्यचलच्चित्रे दृष्टुं गच्छति। भूल भुलैया इत्यादिषु सफल- भयानक-हास्यचलच्चित्रे इत्यस्मिन् जनाः अक्षयः बहु रोचन्ते स्म। परन्तु तदनन्तरं अक्षयः पुनः भयानकहास्यचलच्चित्रं न कृतवान्। अधुना च अक्षयः पुनः भयानकहास्यचलच्चित्रं करोति। अक्षयः बहुवर्षेभ्यः परं पुनः प्रियदर्शनेन सह कार्यं कुर्वन् अस्ति। प्रियदर्शनः अक्षयः च भयानकहास्यचलच्चित्रं भूत बंगला आनयन्ति। अद्यकाले प्रशंसकाः भूत बंगलाविषये अतीव जिज्ञासवः सन्ति। चलचित्रस्य विषये नूतनाः वार्ता अपि निरन्तरं बहिः आगच्छन्ति। भूत बंगला इति चलच्चित्रस्य चित्रोतलनं कतिपयेभ्यः मासेभ्यः पूर्वम् आब्धम्। अक्षयः चलच्चित्रस्य चित्रोतलनं कार्ये सम्मिलितः अस्ति। अधुना च चित्रोतलनमध्ये एकः अभिनेता भूता बंगला चलच्चित्रे प्रविष्टः अस्ति। देवदास, गुरु, गोलमाल, बर्फी, पीकू इत्यादिषु चलच्चित्रेषु कार्यं कृतवान् जिशू सेनगुप्ता भूत बंगला इति चलच्चित्रे प्रविष्टा अस्ति। चलच्चित्रे जिशू मुख्यभूमिकायां दर्शनं दास्यति।

# पंजाबस्य अमृतसरजनपदे विकृतमदिरायाः सेवनेन

### एकविंशति-जनाः मृत्युमुपगताः



हिमसंस्कृतवार्ताः - पंजाबस्य अमृतसरजनपदे मजीथा-क्षेत्रे कथितरूपेण विकृतमदिरायाः सेवनेन एकविंशतिजनाः मृत्युमुपगताः षट् जनाः च चिकित्सालये उपचाररताः सन्ति । मुख्यमन्त्री भगवन्तमानः पीडितानां परिवारान् अमिलत् आश्वासनं च प्रायच्छत् यत् घटनायै उत्तरदायिनः आरोपिणः अवश्यमेव दण्ड्यन्ते । अस्मिन् घटनाप्रकरणे द्वौ अधिकारिणौ, एकः आरक्ष्युपाधीक्षकः, आरक्षिकेन्द्राधिकारी च निलम्बिताः अभवन् । अमृतसरजनपदस्य उपायुक्ता साक्षीसाहनी इत्येषा अकथयत् यत् एषा घटना दुर्भाग्यपूर्णा वर्तते। तया आश्वासितं यत् सर्वकारेण यथासंभवं सहाय्यप्रदानं क्रियते। सा उक्तवती यत् आरोपिणः आपूर्तिकर्तारः निगडिताः सन्ति, अस्याः घटनायाः अन्वीक्षणं च प्रवर्तते ।

# राजीवगान्धिविश्वविद्यालये द्विदिवसीय-अभ्यासकार्यशालायाः भव्यः प्रारम्भः




**हिमसंस्कृतवार्ता डॉ. निशिकान्त-पाण्डेयः, रोणोहिल्स।**

"संस्कृतं संस्कृतिश्च परम्परायाः भारतीयज्ञानपरम्परायाम् अन्तर्निहितं विज्ञानराशिम् अन्वेषयन्तः" इत्यस्य नाम्नि द्विदिवसीया संस्कृताभ्यासकार्यशाला, या राजीवगान्धिविश्वविद्यालयेन केन्द्रसंस्कृतविश्वविद्यालयेन सह संयोज्य आयोजिताऽभवत्, सा २०२५ तमे वर्षे मईमासस्य सप्तमदिनाङ्के आरब्धा। उद्घाटनसत्रे विद्वत्सभाषणानि, सांस्कृतिकप्रस्तुतयः, विवेकानन्द-केन्द्रशिक्षण-महाविद्यालय-निर्जुलीशाखायाः छात्रेभ्यः च विश्वविद्यालयीय- भागभागितं च दृष्ट्वा समारम्भः अतीव उत्साहपूर्णः अभवत्। समारम्भः राजीवगान्धिविश्वविद्यालयस्य कुलगीतेन, दीपप्रज्वलनेन, च मणमि गाम्लिन इत्यस्याः छात्रायाः (वि. के. वि. निर्जुली) आकर्षकं मङ्गलाचरणनृत्यं च द्वारा आरब्धः। डॉ. एन. टी. रिकम, विश्वविद्यालयस्य कुलसचिवः, स्वागतभाषणं दत्तवान्। सः भाषणे भारतस्य समृद्धया भाषिक- सांस्कृतिक- परम्परायाः संरक्षणस्य संवर्धनस्य च आवश्यकता अधिगर्ह्य, संस्कृतभाषायाः च 'संस्कृतेः' च आधुनिके सन्दर्भे महत्त्वं प्रकाशयत्। कार्यशालायाः स्वरूपं ध्येयञ्च मोयिर् रिबा, (शैक्षिक- प्रशासनिक- समन्वयकः, दूरशिक्षाकेन्द्रे) वक्तुं पर्यवर्तत।प्रो. प्रह्लाद आर. जोशी, कुलपतिः, कामरूपीय- भारतीयविद्यापीठः च संस्कृतविश्वविद्यालयः (नलबारी, असम), उद्घाटनभाषणं दत्तवान्, यत्र सः आधुनिकभारतसन्दर्भे संस्कृतशिक्षायाः अनिवार्यता विस्तरेण विवृणोत्। माननीयः सभाध्यक्षः टेसम पोंगटे महोदयः भाषमाणः अवदत् यत् अरुणाचलप्रदेशसरकारस्य सक्षमनेतृत्वे मातृभाषायाः शिक्षायाः प्रारम्भः जातः, किन्तु क्षेत्रस्य पारम्परिकाणां 'शामानिक- जप' भाषाणां पुनर्जीवनस्य आवश्यकता इत्यपि सः उल्लिख्य सम्यगुपदिष्टवान्। प्रो. आशन् ऋङ्गिः, दूरशिक्षाकेन्द्रनिदेशकः, कृतज्ञतावाक्यैः उद्घाटनसत्रं समापनं कृतवान्। राष्ट्रगानं पश्चात् अल्पोपहारसमयः आसीत्। अनन्तरं "अरुणाचलप्रदेशे संस्कृतशिक्षायाः आवश्यकता" इत्यस्मिन् विषयवस्तुनि एकं विमर्शपर्वम् अभवत्। अस्मिन् चर्चासत्रे प्रो. प्रह्लाद जोशी, डॉ. वी. के. मिश्रः, प्रो. ओकन् लेगो, डॉ. अरुणकुमारपाण्डेयः इत्येते वक्तारः सम्मिलिताः। प्रो. जोशी महोदयः संस्कृतभाषायाः इतिहासं, तस्य प्रारम्भं, च मैकालेयस्मिन् १८३५ तमे भाषणानन्तरं तस्य अपगमनं च विवृणोत्। प्रो. ओकन लेगो महोदयः अरुणाचलप्रदेशे संस्कृतशिक्षायाः महत्त्वं प्रतिपादितवान्। डॉ. मिश्रः तु भाषायाः व्याकरणरचनायाः सौष्ठवेन च चार्ल्स् बैबेजादयः उन्नविंशतिशतकीयतर्कशास्त्रज्ञाः आकर्षिताः सन्ति इत्यपि व्यक्तं कृतवान्। एवं च संस्कृतव्याकरणस्य आधुनिकतर्क- गणनात्मकविचारेषु सम्भाव्यप्रभावः अपि समुल्लिखितः। एतेषां वक्तव्येभ्यः अनन्तरं टिङ्कुदेवी, कार्यशालायाः सह- समन्वयिका, या च दूरशिक्षाकेन्द्रे संस्कृतशिक्षाकेन्द्रे शिक्षिका अस्ति, सा 'भाषापरिचय' इत्यस्मिन् अन्तर्गतं संस्कृतभाषायाः मूलतत्त्वानि सहभागिभ्यः अवगतवती। दिनस्य समापनं 'भाषाक्रीडा' इत्यनेन अभवत्। अयं कार्यक्रमः नीलकमलपण्डितः (दारङ्गमहाविद्यालये सहप्राध्यापकः), ऋतुपर्णा शर्माणिता देवी च (कामरूपीयभारतीयविद्यापीठस्य शोधार्थिन्यः) इत्येतेषां नेतृत्वेन सञ्चालितः। अनेन संस्कृतभाषायाः अधिगमे 'क्रीडया सह शिक्षणम्' सुफलमभवत्। राष्ट्रगानस्य घोषेण दिनस्य समापनम् अभवत्।अयं कार्यक्रमः २०२५ तमे वर्षे मेमासस्य अष्टमे दिनाङ्के ओजू-मिशन-विद्यालये (नाहरलागुन) छात्रेभ्यः संस्कृताभिमुखीकरणं द्वारा अग्रे अपि चालितुं नियोजितः अस्ति।

# संस्कृत भारती प्रतिनिधयः SCERT पंजाब निदेशकेन संस्कृतशिक्षाविषये चर्चाम् अकुर्वन्



**हिमसंस्कृतवार्ताः- मोहाली, पंजाबम्।**

संस्कृतभारती पंजाबस्य प्रतिनिधिमण्डलम् SCERT पंजाबस्य निदेशकम् अमनिंदर कौर बराड़ इत्यनया सह चर्चाम् अकरोत्, अस्यां चर्चायां पंजाबप्रदेशे संस्कृतशिक्षासुधारस्य आवश्यकता चर्चिता। संस्कृतभारती पंजाबस्य अध्यक्षः डॉ. वीरेंद्र कुमारः अकथयत् यत् संस्कृतम्, अस्य भूमेः प्राचीनभाषा अस्ति, किन्तु पंजाबस्य शिक्षानीतौ एषा उपेक्षिता। सः अवदत् यत् गतत्रिंशत्वर्षेभ्यः विद्यालय- संस्कृत- पाठ्यपुस्तकानि न परिवर्तितानि, संस्कृताध्यापकानां कौशलविकासाय कोऽपि शिक्षणपाठ्यक्रमः न आयोजितः। एतत्समस्यायाः समाधानाय संस्कृत भारती पंजाबेन SCERT माध्यमेन पंजाबसर्वकारम् पाठ्यक्रमस्य संशोधनम्, आधुनिकयुगे उपयुक्तीकरणे सहाय्यं कर्तुं प्रस्तावितम्, विशेषाध्यापकप्रशिक्षणम् अपि प्रस्तावितम्, यस्मिन् अन्ताराष्ट्रीयस्तरस्य संस्कृतविद्वांसः, शिक्षाविदः विद्यालयाध्यापकान् प्रशिक्ष्यन्ति। प्रतिनिधिमण्डलस्य सदस्यः डॉ. ओमन दीपः एतां चर्चां सकारात्मकम् अवदत्। सः अकथयत् यत् निदेशकः प्रशिक्षणमॉड्यूल्स इत्यस्य विषये अधिकं विवरणं याचितवती। प्रतिनिधिमण्डलः एतेभ्यः मेलनेभ्यः प्रभावयुक्तानां परिणामानाम् आशां करोति। अस्मिन्नवसरे सहमंत्री अजयकुमारआर्यः अपि उपस्थितः आसीत्।

## हिमसंस्कृतवार्ता:, डॉ. विवेक शर्मा, जोगिन्द्रनगरम् *सामान्यज्ञानम्*

प्रश्न: 1. गया- विमानपत्तनम् कुत्र अस्ति?
उत्तरम् : गया (बिहारराज्ये)।
प्रश्न: 2. 'ब्राह्मणसर्वस्व:' इत्यस्य रचयिता क: अस्ति?
उत्तरम् - 'हलायुध:'।
प्रश्न: 3. 'मक्षिकाणामभाव:' इत्यस्य समस्त पदं किम्?
उत्तरम्- "निर्मक्षिकम्'। (अव्ययीभाव:)
प्रश्न: 4. 'मुरारि:' इत्यस्य सन्धि- विच्छेदं कुरुत-
उत्तरम्- 'मुर + अरि:'।
प्रश्न: 5. राष्ट्रीय- केन्द्रीय- उत्पाद- शुल्कदिवस: कदा भवति?
उत्तरम् – फरवरीमासस्य चतुर्विंशतिः दिनांके।
प्रश्न: 6. वीर- सावरकर- अंतरराष्ट्रीय- विमानपत्तनम् कुत्र अस्ति?
उत्तरम् : पोर्ट ब्लेयर, अंडमान निकोबार द्वीपसमूहे च।
प्रश्न: 7. 'अनेकार्थसंग्रह:' इत्यस्य रचयिता क: अस्ति?
उत्तरम् - 'हेमचन्द्र:'।
प्रश्न: 8. 'विष्णो पश्चात्' इत्यस्य समस्त पदं किम्?
उत्तरम्- 'अनुविष्णु:'। (अव्ययीभाव:)
प्रश्न: 9. 'तवाशा' इत्यस्य सन्धि- विच्छेदं कुरुत-
उत्तरम्- 'तव + आशा'।
प्रश्न: 10. राष्ट्रीय- शिक्षक- दिवस: कदा भवति?
उत्तरम् – सितम्बरमासस्य पञ्चदिनांके।
प्रश्न: 11. सरदारवल्लभभाईपटेल- अंतरराष्ट्रीय विमानपत्तनम् कुत्र अस्ति?
उत्तरम् : अहमदाबाद (गुजरातराज्ये)।
प्रश्न: 12. 'अभिधनचिन्तामणि:' इत्यस्य रचयिता क: अस्ति?
उत्तरम् - 'हेमचन्द्र:'।
प्रश्न: 13. 'रूपस्य योग्यम्' इत्यस्य समस्त पदं किम्?
उत्तरम्- 'अनुरूपम्। (अव्ययीभाव:)

# परमाणु शक्तिः एकम् चिन्तनम्

- डॉ मनोज शैलः

## हिरोशिमा-नागासाकी-स्थानयोः पातितेभ्यः परमाणुविस्फोटकेभ्यः अपेक्षया रूसस्य ज़ार-परमाणुविस्फोटकः ३३०० गुणाधिकः विनाशकारी



अद्यतनकाले यदा युद्धस्य शस्त्रस्य च चर्चा भवति तदा परमाणुविस्फोटकस्य नाम प्रथमं भयङ्करतमं शस्त्रं भवति। एतत् शस्त्रं यत् कतिपयेषु निमेषमात्रेषु कोटि-कोटि-जनानाम् प्राणान् नाशयितुं शक्नोति, नगरं भस्मरूपेण परिणमयितुं च शक्नोति। अद्यपर्यन्तं विश्वस्य सर्वाधिकशक्तिशाली भयङ्करः च परमाणुविस्फोटकः सोवियतसङ्घस्य (रूसस्य) स्वामित्वे आसीत्। अस्य विस्फोटकस्य नाम आसीत्– ज़ारविस्फोटकः (Tsar Bomba) इत्यासीत्।

### जारविस्फोटकः कियत् भयङ्करः अस्ति?

यदि जनसङ्ख्यायुक्ते नगरे ज़ारविस्फोटकः पतितः स्यात् तर्हि तस्य परिणामः विनाशकारी स्यात्। प्रायः ३००० वर्गकिलोमीटर क्षेत्रं सर्वथा नष्टं स्यात्, अर्थात् सम्पूर्णं महानगरं क्षणमात्रेण निर्मूलितं स्यात्। विस्फोटः एतावत् प्रबलः स्यात् यत् २० तः ३० लक्षमिताः जनाः तत्क्षणमेव मृताः भवितुम् अर्हन्ति स्म। विस्फोटस्य शक्तिः ५० किलोमीटर यावत् दूरं भवनानि ध्वंसयितुं शक्नोति स्म, १०० किलोमीटर यावत् दूरं जनाः दग्धीभूताः शक्यन्ते स्म। तापमानम् एतावत् अधिकं स्यात् यत् मनुष्याः, वृक्षाः, भवनानि च वाष्पीकरणं भवितुं शक्नुवन्ति स्म। तदनन्तरं वायुतले प्रसारिताः रेडियोधर्मीकणाः सहस्राणि किलोमीटर्पर्यन्तं विषं प्रसारयितुं शक्नुवन्ति स्म, येन कर्करोगस्य, जन्मदोषस्य, दीर्घकालीनरोगाणां च संकटः वर्धते स्म यदि एतादृशाः बहवः विस्फोटकाः उपयुज्यन्ते स्म तर्हि सूर्यप्रकाशः मासान् यावत् पृथिव्यां न प्राप्स्यति स्म। वायुमण्डलं धूलस्य भस्मस्य च स्तरेन आच्छादितं भविष्यति, येन वैश्विकतापमानस्य न्यूनता भविष्यति तथा च "परमाणुशीतकालस्य" ("न्यूक्लियर विंटर") सदृशी स्थितिः भविष्यति या मानवसभ्यतायाः अन्त्यं कर्तुं शक्नोति।

### अमेरिकादेशस्य द्वौ शक्तिशालिनौ विस्फोटकौ- कैसल ब्रावो, कैसल यांकी च

अमेरिकादेशे विश्वस्य द्वितीयः शक्तिशाली परमाणुविस्फोटकः अस्ति, यस्य नाम कैसल ब्रावो (Castle Bravo) इति। १९५४ तमे वर्षे परीक्षणार्थं बिकनी एटोलक्षेत्रे पातितम्। अस्य विस्फोटः अपि अत्यन्तं शक्तिशाली आसीत्, तस्य विकिरणं च बहुधा प्रसारितम्। तृतीयस्थाने अपि अमेरिकनविस्फोटकः आगच्छति– कैसल यांकी (Castle Yankee) इति। एतत् अमेरिकादेशस्य परमाणुशक्तेः महत् प्रतीकम् अपि मन्यते।



### परमाणुशस्त्राणां जगति संकटापन्ना स्पर्धा

एतेषां विस्फोटकानां शक्तिः पर्याप्तं यत् यदि तेषां उपयोगः युद्धे क्रियते तर्हि न केवलं एकः देशः अपि तु समग्रं विश्वं संकटग्रस्तं भवितुम् अर्हति। अत एव अद्यत्वे अपि विश्वे परमाणुविस्फोटविषये अत्यन्तं सावधानता क्रियते।

अस्य देशस्य परमाणुविस्फोटकः महत्तमः अस्ति, भारत-पाकदेशयोः परमाणुविस्फोटकाः अपि तस्य पुरतः अल्पतराः। यदा यदा भारत-पाकिस्तानयोः मध्ये विवादः वर्धते तदा तदा परमाणुशस्त्रविषये चर्चा तीव्रताम् अवाप्नोति। उभयदेशयोः पर्याप्तसङ्ख्यायां परमाणुशस्त्राणि सन्ति, परन्तु किं भवन्तः जानन्ति यत् कस्मिन् देशे विश्वस्य महत्तमः परमाणुविस्फोटकः अस्ति? तस्य मूल्यं श्रुत्वा भवन्तः स्तब्धाः भविष्यन्ति।

### अमेरिकादेशस्य बी ६१-१२ विस्फोटकः महत्तमः अस्ति

अमेरिकनवैज्ञानिकसङ्घस्य प्रतिवेदनानुसारं अमेरिकादेशस्य बी ६१-१२ परमाणुविस्फोटकः विश्वस्य महत्तमं परमाणुशस्त्रम् अस्ति। अस्य मूल्यं प्रायः २८ मिलियन डॉलर अर्थात् प्रायः २२७८ कोटिरूप्यकाणि अस्ति। एषः विस्फोटकः एतावत् घातकः अस्ति यत् तस्य उपयोगात् पूर्वमपि शत्रुदेशानां चिन्ता वर्धते। एतं विस्फोटकं पातयितुं न केवलं विशेषविमानं अपितु प्रक्षेपणव्यवस्था, क्षेपणास्त्रं, रसदसमर्थनं च आवश्यकम् अस्ति। अस्य अर्थः अस्ति यत् तस्य व्ययः केवलं विस्फोटपर्यन्तं सीमितः नास्ति, अपि तु तस्य संचालनार्थं सम्पूर्णं तन्त्रं समाविष्टं कृत्वा विश्वस्य महत्तमं परमाणुव्यवस्था भवति।

### भारते १८० परमाणुशस्त्राणि

भारते प्रायः १८० परमाणुशस्त्राणि सन्ति। भारतस्य नीतिः 'पूर्वं प्रयोगः नैव' अर्थात् 'No First Use' इति आधारेण अस्ति, परन्तु यदि शत्रुः आक्रमणं करोति तर्हि भारतस्य योग्यं उत्तरं दातुं शक्तिः अस्ति। भारतस्य परमाणुशस्त्राणि स्थलात्, समुद्रात्, वायुतः च प्रहारयितुं शक्यन्ते, यत् 'त्रिस्तरीयक्षमता' इति कथ्यते।

### पाकिस्ताने १७० परमाणुशस्त्राणि

पाकिस्तानस्य समीपे प्रायः १७० परमाणुशस्त्राणि सन्ति। परन्तु पाकिस्तानस्य आर्थिकस्थितिः एतावता दुर्गता अस्ति यत् सः स्वस्य परमाणुशस्त्राणि विक्रीणाति चेदपि देशस्य ऋणं सम्पूर्णतया परिशोधितुं न शक्यते। एकस्य प्रतिवेदनस्य अनुसारं पाकिस्तानस्य परमाणुशस्त्राणां कुलम् अनुमानितव्ययः ४४५५ कोटिडॉलर इति अस्ति, पाकिस्तानस्य विदेशीयऋणं २७४० कोटिडॉलरस्य समीपे अस्ति।

## हास्यकणिका



पिता - पापा अभवत्
माता - मम्मी अभवत्
भ्रातः - ब्रो अभवत्
मातृस्वसा (मौसी) - मासी अभवत्
पितृव्यः (चाचा) - चाचू अभवत्
आवुत्तः (जीजा) - जीजू अभवत्
पतिः - हबी अभवत्
परञ्च कस्यचित् साहसं न भवति किं यत् पत्नी शब्दैः सह परिवर्तनं कुरुत।

## "लौकिकन्यायकोशः""कुल्याप्रणयन्यायः"



नदीतः क्षेत्रे जलं प्रवहतु इति धिया एका कुल्या निर्मियते चेत् तया कुल्यया क्षेत्रस्य एव प्रयोजनं भवति इति नास्ति, अपराणि अपि प्रयोजनानि भवन्ति। एकया क्रियया अनेकप्रयोजनानि साध्यन्ते इति अनेन न्यायेन बोध्यते।

डा. वर्षा प्रकाश टोणगांवकर
पुणे/ महाराष्ट्रम्